# श्रीदत्तात्रेयस्तवः

Shri Dattatreyastavah

sanskritdocuments.org

November 10, 2018

# Shri Dattatreyastavah

# श्रीदत्तात्रेयस्तवः

## Sanskrit Document Information

Text title : dattAtreyastavaH

File name : dattAtreyastavaH.itx

Category : deities_misc, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, dattatreya

Location : doc_deities_misc

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# श्रीदत्तात्रेयस्तवः

दत्तात्रेयपदाब्जं वित्ताधीशाधिदेववर्यैड्यम् ।
हृत्तापहारचतुरं चित्तामलभावसिद्धये नौमि ॥ १॥

अनसूयासुतमीडे वनसञ्चारप्रसक्तचेतस्कम् ।
कनकप्रदाननिरतं वनमालाभूषितग्रीवम् ॥ २॥

अविमुक्तस्नानरतं कोल्हापुरमध्यमन्त्रजपशीलम् ।
सह्याद्रिशयनलोलं माधूकरभैक्ष्यभोजनं वन्दे ॥ ३॥

आशाम्बरं प्रपद्ये पाशापहमाशु पादनम्राणाम् ।
केशावधूतसूर्यं काशाग्रचलन्मनोनिरोधाय ॥ ४॥

औदुम्बरतरुमूले कृतवासं कृष्णभक्तिदानरतम् ।
औदुम्बरादिदिव्यक्षेत्रावासं नमामि योगीशम् ॥ ५॥

शरदिन्दुतुल्यवदनं करराजद्बोधमुद्रमतिसुलभम् ।
तरणाय भवपयोधेः शरणं यास्यामि दत्तयोगीन्द्रम् ॥ ६॥

कृतवीर्यपुत्रदेशिकमिन्दुप्रतिमानवदनकञ्जातम् ।
बिम्बाधरमनसूयामुखपद्मार्कं नमामि गुरुदत्तम् ॥ ७॥

कृत्ताघवृन्द नमतां चित्ताम्बुजमध्यसंस्थ भक्तानाम् ।
दत्तात्रेय कृपाब्धे यत्ताक्षाराध्यचरण मां पाहि ॥ ८॥

क्रव्यादवैरिरूपो नव्याम्बुदसन्निकाशदेहरुचिः ।
भव्याय भवतु योगी निर्व्याजदयासुधाम्बुधिः कोऽपि ॥ ९॥

गतिविजितमत्तनागं मतिदानधुरन्धरं प्रणम्रेभ्यः ।
यतिततिपूजितपादं पतितावनदीक्षमेनमाकलये ॥ १०॥

गोरक्षकमुखयोगिभिरादरतः सेव्यमानपदपद्मम् ।
गोब्राह्मणहितकारणमत्रेः सुतमातनोमि हृत्पद्मे ॥ ११॥

घुटिकाञ्जनमुखसिद्धीर्घटिकातः प्राप्नुवन्ति यद्भक्ताः ।
स्फटिकाक्षमालिकाढ्यं तडिदाभं नौमि तं दत्तम् ॥ १२॥

दिननाथतुल्यवसनं दिष्ट्यैकप्राप्यचरणपाथोजम् ।
दिवि भुवि पाताले च प्रचरन्तं नौमि योगिनं कञ्चित् ॥ १३॥

बालोन्मत्तसदृक्षं कालोत्पन्नाशनेन सन्तुष्टम् ।
मालोल्लसद्गलतटं कालोच्छित्त्यै नमामि दत्तमुनिम् ॥ १४॥

भरताग्रजभक्ताग्र्यं भद्राणि दिशन्तमाशु नम्रेभ्यः ।
भवभीतिभञ्जनचणं दत्तात्रेयं नमामि मोदेन ॥ १५॥

भवनीकृतानतहृदं भक्ताज्ञानेभदलनपञ्चास्यम् ।
भसितावलिप्तगात्रं भव्यकरं नौमि दत्तमुनिवर्यम् ॥ १६॥

यस्याष्टविधा मन्त्राः शीघ्रं सिद्धिप्रदायकास्तिष्ये ।
तस्याङ्घ्रिपङ्कजमहं दत्तात्रेयस्य नौमि योगीशः ॥ १७॥

यागादिकर्मलभ्यं भोगालिं नम्रपङ्क्तये ददतम् ।
योगाधिरूढमनिशं नागाधिपशायिनं नमस्यामि ॥ १८॥

खधूतहंसगर्वं नवनवकविताप्रदानधौरेयम् ।
विधिहरिशिवस्वरूपं प्रवणं वन्दे नतावने कञ्चित् ॥ १९॥

वैराग्यदाननिरतं तीरातिक्रान्तवैभवोपेतम् ।
काराबन्धविमोचकमैरावतयायिसेवितं नौमि ॥ २०॥

शरणागतपरिरक्षणनिरतं तरुणं तमालसमदेहम् ।
सरसिजसदृक्षनयनं शरणं यास्यामि दत्तमुनिनाथम् ॥ २१॥

कथितागमार्थसारं मथिताखिलदुःखकारणाविद्यम् ।
पथि परमे स्थितमनिशं शिथिलितपापौघमाश्रये दत्तम् ॥ २२॥

शीर्षत्रयेण सहितं शीर्षं वेदत्रयस्य नतलोकान् ।
सम्बोधयन्तमनिशं भावयतु स्वान्तमादराद्यमिनम् ॥ २३॥

स्मृतिमात्रतुष्टहृदयं मतिदं तरसाङ्घ्रिनम्रलोकाय ।
शितिकण्ठमित्रमीडे कृतिनां प्रत्यक्षमन्वहं दत्तम् ॥ २४॥

गोरक्षाद्यैर्मुख्यसुशिष्यैः परिवीतं
गोविप्राणां पोषणसक्तं करुणाब्धिम् ।

गोलक्ष्मीशाम्बुजभवगिरिजासखरूपं
दत्तात्रेयश्रीपदपद्मं प्रणतोऽस्मि ॥ २५॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितः श्रीदत्तात्रेयस्तवः सम्पूर्णः ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Dattatreyastavah*

pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*